This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 2255. विषय पुराण

नाव अध्यात्म रामायण उत्तरकांड (मुद्रित)

लेखक / लिपीकार —

पृष्ठ 14 काळ — पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्विषयचित्तः सविषयत्वसंपादकत्वेनचिच्छक्तिरूपयामाययाविसृज्यत्यक्त्वास्वकंसनातनंधामवैकुंठंचहित्वा ३७ अतःप्रथमंत्वमाग
छततःसआगमिष्यत्येवशक्त्याविनाशक्तिमतःस्थातुमशक्यत्वात् ३८ ३९ ४० लोकवादरूपंमिषंकल्पयित्वाततोभीतः अपरइव

त्वयासमेतश्चिच्छक्त्यारामस्तिष्ठतिभूतले विसृज्यास्मान्स्वकंधामवैकुंठंचसनातनम् ३७ आस्तेत्वयाजगत्धा-
त्रिरामःकमललोचनः अतोऽग्रेयाहिवैकुंठंत्वंतथाचेद्रघूत्तमः ३८ आगमिष्यतिवैकुंठंसनाथान्नःकरिष्यति इ
तिविज्ञापिताहंतैर्मयाविज्ञापितोभवान् ३९ यद्युक्तंतत्कुरुष्वाद्यनाहमाज्ञापयेप्रभो सीतायास्तद्वचःश्रुत्वारा
मोध्यात्वाब्रवीत्क्षणम् ४० देविजानामिसकलंतत्रोपायंवदामिते कल्पयित्वामिषंदेविलोकवादंत्वदाश्रयम् ४१
त्यजामित्वांवनेलोकवादाद्भीतइवापरः भविष्यतःकुमारौद्वौवाल्मीकेराश्रमांतिके ४२ इदानींदृश्यतेगर्भःपुन
रागत्यमेंतिकम् लोकानांप्रत्ययार्थंत्वंकृत्वाशपथमादरात् ४३ भूमेर्विवरमार्गेणवैकुंठंयास्यसिद्रुतम् पश्चाद
हंगमिष्यामिएषएवकृतनिश्चयः ४४ इत्युक्त्वातांविसृज्याथरामोज्ञानैकलक्षणः मंत्रिभिर्मंत्रतत्त्वज्ञैर्बलमुख्यैश्च
संवृतः ४५ तत्रोपविष्टंश्रीरामंसुहृदःपर्युपासत हास्यप्रौढकथाःकृत्वाहासयंतःस्थिताहरिं ४६ कथाप्रसं-
गात्सप्रच्छरामोविजयनामकम् पौराजनपदामेकिंवदंतीवशुभाशुभम् ४७ सीतांवामातरंवामेभ्रातॄन्वाकैके
यीमथ नभेतव्यंत्वयाब्रूहिशापितोसिममोपरि ४८ इत्युक्त्वाप्राहविजयोदेवसर्वेवदंतिते कृतंसुदुष्करंसर्वं
रामेणविदितात्मनः ४९

पृथक्जनइवत्वांत्यजामि सर्वस्यापिस्वकल्पनारूपत्वात्इममपिजनमनसिकल्पयिष्यामीत्याशयः
४१ ४२ प्रत्ययार्थंसीतानेदृशीतिविश्वासार्थम् ४३ ४४ ४५ हास्यविषयेप्रौढाश्चतेकथाश्चताः ४६ इहएतज्जन्मविषये ४७ सीता
मित्यादेः प्रतीतिशेषः तत्रतद्विषयंकिंशुभाशुभंवदंतीत्यर्थः शापितोसिस्वशपथपूर्वंपृच्छामीत्यर्थः ४८ ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेश्मप्रत्यपादयत्गृहंप्रवेशितवान् ५० यादुष्टेनरावणेनत्हताबलान्नीतासापिगृहंप्रवेशितेतिअकृत्यमेतदितिशेषः ५१ किंचैवंसति अस्मदादीनामपियोषितांदुष्कर्ममर्षणंतद्योग्यंसहनयोग्यंभवेत् भविष्यतीत्यर्थः तदेवस्पष्टयतियादृगितिनियतंनियमेन प्रजास्तादृशोभवंतिराजव्यवहारानुरूपव्यवहाराभवंतीत्यर्थः ५२ ५३ लोकापवादःकलंकःसमानीयअंतःपुरान्निष्काश्य रथेनपुनरायाहि

किंतुहत्वादशग्रीवंसीतामाहृत्यराघवः अमर्षंपृष्ठतःकृत्वास्ववेश्मप्रत्यपादयत् ५० कीदृशंतुहृदयेतस्यसीतासंभोगजंसुखम् यात्हृताकिंजनेरण्येरावणेनदुरात्मना ५१ अस्माकमपिदुष्कर्मयोषितामर्षणंभवेत् यादृग्भवतिवैराजातादृश्योनियतंप्रजाः ५२ श्रुत्वातद्वचनंरामःस्वजनान्पर्यपृच्छत तेपिनत्वाब्रुवन्नाममेवमेतन्नसंशयः ५३ ततोविसृज्यसचिवान्विजयंसुहृदस्तथा आहूयलक्ष्मणंरामोवचनंचेदमब्रवीत् ५४ लोकापवादस्तुमहान्सीतामाश्रित्यमेऽभवत् सीतांप्रातःसमानीयवाल्मीकेराश्रमांतिके ५५ त्यक्त्वाशीघ्रंरथेनत्वंपुनरायाहिलक्ष्मण वक्ष्यसेयदिवाकिंचित्तदामांहतवानसि ५६ इत्युक्तोलक्ष्मणोभीत्याप्रातरुत्थायजानकीं सुमंत्रेणरथेकृत्वाजगामसहसावनम् ५७ वाल्मीकेराश्रमस्यांतेत्यक्त्वासीतांसुवाचसः लोकापवादभीत्यात्वांत्यक्तवान्राघवोवने ५८ दोषेनकश्चिन्मेमातर्गच्छाश्रमपदंमुनेः इत्युक्त्वालक्ष्मणःशीघ्रंगतवान्रामसन्निधिम् ५९ सीतापिदुःखसंतप्ताविललापातिमुग्धवत् शिष्यैश्रुत्वाचवाल्मीकिःसीतांज्ञात्वासदिव्यधृक् ६०

इत्युक्त्वासीतायाअपिरथेननयनंसूचितंनतुसाक्षात्तथोक्तंतस्यांक्रोधातिशयंद्योतयितुमेवमांहतवानसिअत्रार्थैविपरीतोक्तोमहद्धप्रयुक्त प्रायश्चित्तमित्यर्थः ५६ ५७ ५८ ५९ अतिमुग्धवत् अत्यज्ञवत्शिष्यैःशिष्यमुखैः ६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनियोषितामर्पयत् एषासर्वथारक्षणीयेतितासांहस्तेदत्तवान् ६१ परात्मनः विष्णोः ६२ मुनिसेवितांघ्रिःमुनिभिःसेवितेंऽघ्रीयस्यमुनी
नांसेवितेंऽघ्रीयेनेतिवा ६३ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्यश्रीरा
मवर्मणःकृतावध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेचतुर्थःसर्गःसमाप्तः ४ अथभगवान्शिवोराम लक्ष्मणसंवादमु-
खेनपरंतत्वमुपदेष्टुमाह ततइतिजगतांयानिमंगलानिआनंदास्तेषामुपजीव्यभूतंमंगलंब्रह्मानंदः सएवात्मास्वरूपंतेनएतस्यैवान
दस्यान्यानिमात्रामुपजीवंतीतिश्रुतेर्मंगलानांचमंगलमितिस्मृतेश्चकिंच जगतांमंगलंकल्याणंयस्मात्तादृशःकल्याणरूपआत्मा मू-

अर्घ्यादिभिःपूजयित्वासमाश्वास्यचजानकीं ज्ञात्वाभविष्यंसकलमर्पयामासयोषिताम् ६१ तास्तांसंपूजयं
तिस्मसीतांभक्त्यादिनेदिने ज्ञात्वापरात्मनोलक्ष्मींमुनिवाक्येनयोषितः सेवांचक्रुःसदातस्याःविनयादिभि
रादरात् ६२ रामोपिसीतारहितःपरात्माविज्ञानदृक्केवलआदिदेवः संत्यज्यभोगानखिलान्विरक्तोमुनिव्रतो
भून्मुनिसेवितांघ्रिः ६३ इतिश्रीमदध्यात्मरामायणेउत्तरकांडेउमामहेश्वरसंवादेचतुर्थःसर्गःसमाप्तः
४ श्रीमहादेवउवाच ततोजगन्मंगलमंगलात्मनाविधायरामायणकीर्तिमुत्तमां चचारपूर्वाचरितं
रघूत्तमोराजर्षिवर्यैरभिसेवितंयथा १ सौमित्रिणापृष्टउदारबुद्धिनारामःकथाःप्राहपुरातनीःशुभाः राज्ञःप्रमत्त
स्यनृगस्यशापतोद्विजस्यतिर्यक्त्वमथाहराघवः २ र्तिस्तयाउत्तमांश्रोत्रादीनांमोक्षदत्वेनात्कृष्टमांरामायणकीर्तिंवाल्मी-
क्यादिकृतनानाविधरामायणप्रवर्तिकांरावणवधादिजांकीर्तिंविधायस्थितोरघूत्तमस्ततःसीतापरित्यागानंतरं पूर्वैःस्ववंशजैराचरितं
प्रजापालनसत्कथाश्रवणादिकंकेवलंतत्पूर्वजैरेवाचरितमितिनकिंत्वन्यैरपिराजर्षिश्रेष्ठैर्यथाभिसेवितंतथाचचारकृतवान् १ उदारा
गुरुदेवविश्वासलक्षणमहागुणवतीयद्वाउदारादानशीलाबुद्धिर्यस्यतेनपुरातनीःप्राचीनराजसंबंधिनीःशुभाःधर्माधर्मनिर्णेत्र्यःप्रमत्त
स्य स्वर्गोमंडलमिश्रितब्राह्मणगोदानात् प्रमत्तस्यनृगस्यराज्ञोद्विजस्यशापात्तिर्यक्त्वमाह तेनाज्ञानकृतब्रह्मस्वापहारेणपरमधार्मिक-
स्यापिदृश्यतेसर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् २ ५ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकांतेविजनेउपस्थितंप्राप्तंविनयान्वितःसन्भक्त्यागुरुरयमितिबुध्याप्रणम्यअनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभावनं भावनाकरणमंतःकरणंयेनसः शुद्धांतःकरणइतियावत्भगवदुक्तसत्कथाश्रवणेनशुद्धांतःकरणइत्यर्थः ३ हेमहामते महती सर्वविषयामतिर्यस्यतस्यसंबोधनंत्वंशुद्धबोधोसिअनवछिन्नचैतन्यरूपोसिसर्वदेहिनामात्मासिजीवानांतत्प्रतिबिंबत्वात् अधी- शोसिअंतर्यामित्वान्नियंतासिवास्तवभेदाभावाच्चसर्वात्मत्वं औपाधिकभेदाच्चनियंतृनियम्यभावोबोध्यःनिराकृतिः अस्मदादिवत् स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैःकथमेवंनज्ञायेतआहज्ञानदृशांस्वयमेवंप्रतीयसेज्ञायतेनेनेतिज्ञानंवेदांतवाक्यजातं

कदाचिदेकांतउपस्थितंप्रभुंरामंरमालालितपादपंकजं सौमित्रिरासादितशुद्धभावनःप्रणम्यभक्त्याविनया न्वितोब्रवीत् ३ सौमित्रिःउवाच त्वंशुद्धबोधोसिहिसर्वदेहिनामात्मास्यधीशोसिनिराकृतिःस्वयम् प्रती यसेज्ञानदृशांमहामतेपदाब्जभृंगाहितसंगसंगिनाम् ४ अहंप्रपन्नोस्मिपदांबुजंप्रभोभवापवर्गंतवयोगिभा- वितं यथांजसाज्ञानमपारवारिधिंसुखंतरिष्यामितथानुशाधिमाम् ५

तद्देवदृक् दर्शनसाधनं येषांतेषामितिसंबंधसामान्येषष्ठीतैरित्यर्थः तादृशदृग्लाभश्चत्वदृक्त्यधीनइत्याह पादेतित्वच्चरणकमलयो र्भृंगवदाहितःकृतःसंगोयेनतादृशांतःकरणसंगवतांत्वच्चरणकमलसंलग्नांतःकरणवतामित्यर्थः ४ अथप्रार्थयते अहमितिभ वस्यसंसारस्यापवर्गोनिवृत्तिर्यस्मात्तादृशंतवपदांबुजंप्रपन्नोस्मिशरणंप्राप्तोस्मि योगिभावितं योगिभिःसंसारमुक्तयेभावितंअने नतस्यभवापवर्गत्वेसदाचारःप्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयत्ज्ञानंसंसारमूलकारणंयथासुखम क्लेशेनतरि- ष्यामितथामामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणतानेनध्वनिता ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथोत्तरमवतारयतिश्रुत्वेतिरामः सौमित्रिवचः श्रुत्वाअथशब्दोवाक्यालंकारे तदाश्रवणाव्यवहितकालेएवप्रपन्नानांभक्तानामार्तिंसंसार
दुःखंहरतितादृशः प्रसन्नाप्रमादिहीनाभक्तानुग्रहपराचधीर्यस्यसः क्षितिपालानांराज्ञांभूषणभूतोज्ञानरूपतमसउपशांतयेतदर्थंसं
धिरार्षः श्रुतिभिः तमेवविदित्वातिमृत्युमेतीत्यादिश्रुतिभिःप्रपन्नंतत्फलकत्वेनबाधितंविज्ञानमात्मतत्वज्ञानमितिसामान्यतः प्रथमंप्रा
ह ६ अथतादृशज्ञानप्राप्तयेक्रमेणबहिरंगांतरंगसाधनान्याह आदाविति स्ववर्णाश्रमेषुशास्त्रेणवर्णिताः याः क्रियानित्यनैमित्तिकय

श्रुत्वाथसौमित्रिवचोखिलंतदाप्राहप्रपन्नार्तिहरः प्रसन्नधीः विज्ञानमज्ञानतमोपशांतयेश्रुतिप्रपन्नंक्षितिपालभू-
षणः ६ श्रीरामउवाच आदौस्ववर्णाश्रमवर्णिताःक्रियाः कृत्वासमासादितशुद्धमानसः समा-
प्यतत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ७

ज्ञदानादिरूपास्ताः कृत्वासमासादितशुद्धमानसः प्राप्तांतःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधना-
निशमदमादीनियेनतादृशः अनेनकर्मणांबहिरंगत्वंशमादीनामंतरंगत्वंस्फुटमेवोक्तं किंचशमदमवैराग्यदार्ढ्यपर्यंतंकर्मानुष्ठानमेवेति
सूचितं ततस्तत्कर्मानुष्ठानंसमाप्यत्यक्त्वासंन्यस्येतियावत् आत्मलब्धयेआत्मज्ञानायतत्फलकायतत्वमस्यादिवाक्यार्थविचारायस
द्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादिलक्षणलक्षितंसमाश्रयेत् सेवेतअनेनव्युत्पत्तिबलेनस्वयमेववाक्यार्थविचारःक्रियमाणोनफलायेति-
सूचितं ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वात् अज्ञाननिवृत्तेश्चतत्वज्ञानैकसाध्यत्वात् तत्वज्ञानस्यचवे
दांतविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवः संसारश्चक्रवद्दिपरिवर्तमानईर्यतेकथ्यते तदेवोपपादयतिआदृत्ता
आदरपूर्वंपूर्वजन्मार्जिताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिस्फुरागिणोविषयाभिलाषवतः तौशास्त्रप्रसिद्धौधर्मेत
रौधर्माधर्मौप्रियाप्रियौस्फुरवदुःखजनकौभवतः कस्यचिदधर्मएवस्फुरवत्वबुध्याप्रवृत्तिः कस्यचित्धर्मएवंकदाचिदित्यप्यूह्यम् एवं
तत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्दिपरिवृत्तिः यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधःपु

क्रियाशरीरोद्भवहेतुराहृताप्रियाप्रियौतौभवतःस्फुरागिणः धर्मेतरौतत्रपुनःशरीरकंपुनःक्रियाश्चक्रवदीर्यते
भवः ८ अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते विद्यैवतन्नाशविधौपटीयसीनकर्मतज्जं
सविरोधमीरितम् ९

नरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरितिबोध्यं ८ तस्यचाज्ञानमेवमूलमित्याहाज्ञानमेवेति अत्रविधौसंसारनि
वृत्तिलक्षणेकर्तव्येर्थेतद्धानमेवमूलकारणत्वादज्ञानहानमेवविधीयतेसाधनत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशं
क्याहविद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः यतस्तत्तज्जंअज्ञानजं आत्मस्वरूपा
ज्ञानजन्यंदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यं ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्कट्यादौदृष्टमित्याशंक्यतज्जन्य १५
त्वंवाननाशकत्वेप्रयोजकंकिंतुसविरोधत्वमेवेत्याह यत्सविरोधंतदीरितंनाशाकमुक्तमित्यर्थः ९ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादियतः कर्मणाविरोधाभावान्नाज्ञाननाशोनापिरागनाशोवस्ततः कर्मानुष्ठानात्पुनः सदोषं
क्षयिष्णुफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनः संसारएवेतिनमुक्तिंप्रत्याशातनस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेने-
नेतिज्ञानंवेदांतवाक्यंतद्विचारवान्भवेत् १० इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेननन्विति
शंकायांयथाविद्यावेदमुखेनश्रुतिपुराणलक्षणेनब्रह्मविदाप्नोतिपरमित्यादिनापुरुषार्थसाधनमुक्तातथाउभाभ्यामेवपक्षाभ्यांयथारवेपक्षि
णांगतिः तथैवज्ञानकर्मभ्यांप्राप्यतेब्रह्मशाश्वतमित्यादिनाक्रियापितत्साधनत्वेनोक्ताकिंचक्रियाकर्तव्यतात्वृतीयार्थेप्रथमाकर्तव्यतयाअ

नाज्ञानहानिर्नचरागसंक्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचा
रवान्भवेत् १० ननुक्रियावेदमुखेनचोदितातथैवविद्यापुरुषार्थसाधनम् कर्तव्यताप्राणभृतः प्रचोदिताविद्या
सहायत्वमुपैतिसापुनः ११ कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा ननुस्वतंत्राध्रुवकार्य-
कारिणीविद्यानकिंचिन्मनसाप्यपेक्षते १२

वश्यकेकृत्यः अवश्यकर्तव्यतयाप्रचोदितानित्यनैमित्तिकरूपा एवंचतदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात्तस्मात्सापुनर्विद्या
यांसहायत्वंप्राप्नोति घटेजननीयेयथादंडचक्रादीनांपरस्परसहायता ११ कर्तव्यतेतिस्वोक्तमेवविवृणोति कर्मेतिवीरहावाएषदेवानां
योग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोतीतिश्रुतिः तत्रसिद्धांतीशंकतेनन्वितिध्रुवांस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः
स्वतंत्राविनापिसहायेनस्वकार्यसंपादनेसमर्थायथातेजस्तिमिरनिवर्तनेसमर्थंमनसापिकिंचित्सहायभूतंवस्तुनापेक्षतेतथाफलेजननी
येसहायांतरसंभावनापिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतंत्रत्वात्तेजोवदित्यनुमानंसूचितम् १२ ७ ७

समुच्चयवादीपरिहरतिनेनेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवतीत्यादिवेदेनबोधितः स्थिरकार्योपि
अध्वरः यथान्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यंगानिदेशकालादीनिचप्रकांक्षतेतथाविद्यापिअग्निहोत्रंजुहोतीत्यादिवि-
धिवाक्यतः तत्समूहेनप्रकाशितैःकर्मभिःसहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षाअंगित्वात् प्रयाजाद्यंगापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् १३ तदनूद्यसिद्धांतीदूषयतिकेचिदिति येकेचिद्वितर्कवादिनइतिज्ञानकर्मणीसमुच्चित्यमुक्ति
साधनंवदंतितदप्यसत् यथाकेवलंकर्ममोक्षसाधनमित्यसत् तथातन्मिलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्व
लोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरोधमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाऽभिमानात्क्रियावृद्धिः विद्या

नसत्यकार्योपिहियद्वदध्वरः प्रकांक्षतेन्यानपिकारकादिकान् तथैवविद्याविधितःप्रकाशितैर्विशिष्यतेकर्मभिरे
वमुक्तये १३ केचिद्वदंतीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् देहाभिमानादभिवर्धतेक्रियाविद्याग-
ताहंकृतितः प्रसिद्ध्यति १४ विशुद्धविज्ञानविरोचनांचिताविद्यात्मवृत्तिश्चरमेतिभण्यते उदेतिकर्माखिलका-
रकादिभिर्निहंतिविद्याखिलकारकादिकम् १५

तुगताहंकृतितः गताहंकृतिर्यस्यतस्यनष्टाहंकृतेः प्रसिद्ध्यतिसार्वविभक्तिक
स्तसिः एवंचाहंकारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः १४ अथपूर्वपक्षोक्तानुमानंदूषयन् विद्यास्वरूपमाह विशुद्धं
विज्ञानंयेभ्यस्तेषांवेदांतवाक्यानांयद्विशेषणरोचनंरलयोरभेदादालोचनंविचारस्तेनांचिताप्रापितायाचरमाआत्मावृत्तिर्ब्रह्माकारांतःकर
णवृत्तिःसाविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणोर्वैषम्यमाहकर्मयज्ञादिअखिलकारकादिभिः कर्तव्यक-
र्मादिभिरंगैश्चसहितंसदुदेतिफलायोन्मुखंभवतिविद्यापुनरखिलकारकादिनिहंतितत्रकर्तृत्वादिबुद्धिंनिहंति सकलव्यापारत्यागेनब्र
ह्मणिसमाप्तिर्हिविद्या अतःसोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षाफलेजनयितव्येतन्निरपेक्षैव अन्यथाविद्यास्वरूपस्यैवभंगापत्तिरि
तिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधात्त्वविद्यायाः कर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतः
कर्मत्यजेत् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिस्तावत्कर्तव्यमेवततोपिब्रह्मणिचित्तस्थैर्यपर्यंतंकर्तव्यंएवत
तस्तदनुसंधानप्रतिबंधकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षोःकर्तव्यमाह निवृत्तासर्वेषामिंद्रियाणांगोचरा
विषयाशब्दादयोयस्मात्तादृशः सन्नात्मनः सच्चिदानंदस्यानुसंधानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेंद्रियप्रत्याहारःक

तस्मात्त्यजेत्कार्यमशेषतःसुधीर्विद्याविरोधान्नसमुच्चयोभवेत् आत्मानुसंधानपरायणःसदानिवृत्त
सर्वेंद्रियवृत्तिगोचरः १६ यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् नेतीतिवाक्यै
रखिलंनिषिध्यतत्ज्ञात्वापरात्मानमथत्यजेत्क्रियाः १७

र्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्राणायामाद्यर्थादाक्षिप्तम् १६ रागिविरागिभेदेनकर्मणांकर्तव्यतामाह यावदिति माययाविद्ययाशरीरादि
ष्वनात्मसुआत्मधीरहंकर्तेत्यादिरूपायावद्वर्ततेतावद्विधिवादकर्मणांविधिर्यजेतेत्यादिवादःकर्तव्यताबोधकोयेषांकर्मणांविधेयो
वरीवर्तितत्कर्मताभवेत् तदपगमेतुतदखिलंजगत् नेतीतिवाक्यैःअथातआदेशोनेतिनेतीत्यादिवाक्यैर्निषिध्यमिथ्यात्वेननिर्णी
यतद्विलक्षणतयासत्यत्वेनपरात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत् निरूपितमेतत् १७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मविज्ञानेसत्यवश्यमविद्यानिवर्त्तनइत्याह यदेतिआत्मनि श्रुत्यर्थेनंःकरणेपरात्मनईश्वरस्यात्मनोजीवस्यचयोविभेदोमायांतःकरणरूपोपाधि-
द्वयकृतोविभेदोभेदस्तस्यभेदकंनाशकंभास्वरंप्रकाशशीलंयद्विज्ञानंइतरहन्तकरूपमर्दनपूर्वकंब्रह्माकाराखंडाद्वृत्तिर्यदावभातिअसंभावनादि-
तिरस्कारेणोदेति तदैवसकारकजन्मांतरप्रापककर्मसहिता मायातन्तज्जीवोपाधिभूताविद्यांजसाझटितिविलीयतेनश्यतिननुतन्नाशोपिसंसा
रनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानंकारणमेवंच तन्नाशेकार्यनाशोभवत्येवेतिभावः १८ उक्तमेवार्थंपुन
र्दार्ढ्यायाह श्रुतीनितत्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेननाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीकाकुरत्रसर्वथानेत्यर्थः

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभातिभास्वरम् तदैवमायाप्रविलीयतेंजसासकारकाकारण
मात्मसंसृतेः १८ श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९ यदिस्मनष्टानपुनःप्रसूयतेकर्त्ताहमस्येतिमतिःकथंभवेत् तस्मात्स्वतंत्रानकिमप्यपेक्षतेविद्याविमोक्षायविभातिकेवला २०

असतःकार्यकारित्वासंभवादितिभावःपुनश्चतस्यनोद्भवइत्याह विज्ञानमात्रादितिअमलाद्वितीयतःशुद्धाद्वितीयात्मविषयकविज्ञानमा-
त्रादितरासहकृतान्निदध्यासनपरिपाकजात्ज्ञानाद्यतोनष्टानस्मात्सापुनर्नभविष्यतिरज्ज्वज्ञानमूलकस्यसर्पस्यरज्जुज्ञानेननिवृत्तस्यय
थानपुनरुत्पत्तिरितिभावः १९ विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याययदीति यदिनष्टान
त्वज्ञाननाशितासानपुनःप्रसूयतेनोत्पद्यते तदाकारणाभावादहंमतिःकथंभवेत्कथमपिनभवेदित्यर्थः तदभावाच्चनत्कालेकर्माभावइति
स्वफलजननेसा स्वतंत्राइतरनिरपेक्षैवनकिमप्यपेक्षतेद्वितीयस्यासंभवात्अतःकेवलाऽ सहायैवविमोक्षायविभातितत्फलिकाभवतीत्य
र्थः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रार्थेश्रुतिरपिप्रमाणमित्याहसेति सामप्रसिद्धानकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरित्यादिकातैत्तिरीयश्रुतिः प्रशस्तानामर्थवादैः प्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाहनतुकर्मसमुच्चयमित्यर्थः तथावाजिनांवाजसनेयिनां एतावदरेखल्वमृतत्वमित्यादिकाज्ञानंविमोक्षायसाधनंनकर्मेत्येतदाह २१ अहंकारत्यागरूपकारणवैषम्यात्क्रियाज्ञानयोर्वैषम्यमुक्त्वाफलप्रयुक्तमपिवैषम्यमाहविद्येतिहेससुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परंतुसमोदृष्टांतोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वात् इत्यनुमानंनिरस्तंदृष्टांताभावात् अन्वय्येवानुमानंनव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपंचितं ननुविद्याकर्मणीसमेएक

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणांस्फुटम् एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१ विद्यासमत्वेनतुदर्शितस्त्वयाक्रतुर्नदृष्टांतउदाहृतः समः फलैः पृथक्त्वाद्बहुकारकैः क्रतुः संसाध्यतेज्ञानमतोविपर्ययम् २२ सप्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धानतुतत्वदर्शिनः तस्माद्बुधैस्त्याज्यमपिक्रियात्मभिर्विधानतः कर्मविधिप्रकाशितम् २३

फलत्वाच्चक्रदंडादिवदित्यनुमानमितिचेत्तत्राहफलैः पृथक्त्वात् षष्ठ्यर्थेतृतीयाफलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतोर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरांतरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानंत्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२ नन्वकरणेप्रत्यवायभियाकर्मकार्यमितिचेन्नेत्याहसप्रत्यवायइतिकर्मत्यागेनहिनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंरूपात्मनिअनात्मधर्मस्यधीरज्ञस्यतत्वज्ञानविकलस्यप्रसिद्धानतुतत्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्चतस्माद्बुधैः कर्मक्रियात्मभिः षष्ठ्यर्थेतृतीयाक्रियाफलसक्तचित्तानांविधानतोविधानेनइतिकर्तव्यतायुक्तंकर्मविधिभिरवश्यकर्तव्यतयाबोधितमपित्याज्यमित्यर्थः २३ ६ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथविरक्तस्यकार्यमाह श्रद्धेति गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःश्रद्धमानसोपिनिष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः
प्रसादाल्लुब्धतस्तत्त्वमसीतिवाक्यतःश्रुतमात्मजीवयोरैकात्म्यंविज्ञायमनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्यचएवार्थःसाक्षात्कृत्यैवसु
खीभवेत् सकलदुःखहीनोभवेदित्यर्थः अप्रकंपनःविषयाऽभिलाषाक्षोभितांतःकरणः २४ महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोध
पूर्वकत्वमाह आदाविति विधानतःक्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआदौप्रथमंमुख्यमितियावत् पदार्थावगतिःका
रणंहिप्रसिद्धं तस्यपदत्रयंतत्त्वमसीति तत्रतत्पदार्थः परमात्मासर्वज्ञत्वादिगुणः त्वंपदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधक

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतोगुरोःप्रसादादपिशुद्धमानसः विज्ञायचैकात्म्यमथात्मजीवयोः सुखीभवेन्मेरुरि-
वाप्रकंपनः २४ आदौपदार्थावगतिर्हिकारणंवाक्यार्थविज्ञानविधौविधानतः तत्त्वंपदार्थौपरमात्मजीवकावसीति
चैकात्म्यमथानयोर्भवेत् २५ प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् संशोधितांलक्षण
याचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत् २६

मसीतिपदं २५ ननुसर्वज्ञत्वादिगुणस्येशस्यकिंचिज्ज्ञत्वधर्मवताजीवेनैकात्म्यंविरुद्धमित्याशंक्याह प्रत्यगिति अहंबुद्धिवेद्यत्वंप्रत्यक्त्वं-
जीवधर्मःपरोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोःसंशोधितांयुक्तिभिःसम्यग्विचारितां
तत्त्वंपदाभ्यांशक्यभावेपिवक्ष्यमाणप्रकारयालक्षणयालक्षितांचिदात्मतांसंगृह्य तत्त्वंपदोपस्थितिविषयांकृत्वास्वमात्मानंतथाज्ञात्वा
थएकात्मज्ञानानंतरंअद्वयोभवेत्चित्स्वरूपतांप्राप्तइवभवेत्पूर्वमपितत्स्वरूपएवविस्मृतकंठचामीकरन्यायेनचतत्प्राप्तिरनइवेतिउक्तंअ
यंभावःतत्त्वंपदयोर्द्वावर्थौवाच्योलक्ष्यश्चतत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यःत्वंपदस्यापिकिंचिज्ज्ञत्वादिविशिष्टोमाया-
कार्याविद्योपाधिरविद्यावदंतःकरणोपाधिर्वाच्यःउभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यःतत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्या
संभवेपिलक्ष्ययोरैक्यंनिर्बाधमेवेति २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तलक्षणास्वरूपमाह एकात्मकत्वादिनिजहतीलक्षणाजहत्स्वार्थलक्षणा यथागंगायांघोषइत्यत्रगंगापदार्थस्यप्रवाहस्य घोषाधारतानुपपत्त्या सर्वथानत्परित्यागेनतीररूपार्थलक्षणा साप्रकृतेन एकात्मकत्वात् विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् तथाजहल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणासापिनविरोधतः विशेषणत्यागेनसर्वथास्वार्थात्यागाभावात् अतोभागलक्षणाजहदजहल्लक्षणायुज्येतअदोषतः पूर्वोक्तदोषाभावात् विशेष्यांशस्यात्यागविशेषणांशस्यत्यागाच्चतत्रदृष्टांतः सोयंपदार्थाविव यथासोयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोतीतानुभवविषयोवानसदार्थः एतद्देशादि

एकात्मकत्वाज्जहतीनसंभवेत्तथाज्जहल्लक्षणताविरोधतः सोयंपदार्थाविवभागलक्षणायुज्येतत्त्वंपदयोरदोषतः २७ रसादिपंचीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् शरीरमाद्यंतवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः २८

विशिष्टोनुभूयमानोवेदंशब्दार्थः तयोश्चविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेनानुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः २७ अथत्याज्यत्वायजीवोपाधिमाह रसादीति रसापृथ्वीआदिर्येषांतानिपंचीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् पंचीकरणंचेत्थंएकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयीयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपंचात्मकंभवति भागाधिक्याच्चप्रातिस्विकतयाभूरादिव्यवहारोपिसुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यंतवत्उत्पत्तिनाशयोगिआदिकर्मजंप्राग्भावीयकर्मजन्यंमायामयंपरंपरयामायाविकारः तद्विकारभूतविकारत्वात् एतच्छरीरमात्मनः स्थूलमुपाधिं वदंतिइतिशेषः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथसूक्ष्मोपाधिमाह सूक्ष्ममिति बुधाअन्यत्स्थूलशरीरविलक्षणंशरीरंलिंगदेहाख्यंआत्मनउपाधिंविदुः तत्स्वरूपमाह सूक्ष्मंचतुराद्य-
विषयः मनोबुद्धिदशेंद्रियैः प्राणैश्चयुतंसंकल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनचक्षुस्त्वक्श्रोत्रेतिपंचज्ञानेंद्रियाणिवाक्पा
णिपादपायूपस्थानिकर्मेंद्रियाणिप्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतंएतत्सप्तदशसमुदायात्मकंतदाधारभूतान्याहापंची
कृतभूतसंभवंतेभ्यउत्पन्नंअतएवादृश्यंतथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनंस्थूलशरीरस्यैतदनुगतस्यैवभोगसा

सूक्ष्मंमनोबुद्धिदशेंद्रियैर्युतंप्राणैरपंचीकृतभूतसंभवम् भोक्तुःसुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनो
बुधाः २९ अनाद्यनिर्वाच्यमपीहकारणंमायाप्रधानंतुपरंशरीरकम् उपाधिभेदात्तुयतःपृथक्स्थितंस्वा
त्मानमात्मन्यवधारयेत्क्रमात् ३०

धनमितिभावः एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् २९ इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह अनादीति अनादिउत्पत्तिहीनं
नानाविधपरिणामशालितयापरिणामरूपेणनश्वरमिति अनादित्वमात्रोक्त्यासूचितम् अनिर्वाच्यंसत्वासत्वाभ्यांनिर्वक्तुमशक्यंका
रणम् सकलप्रपंचस्यजनकंईदृशीमायातुब्रह्मणः परंईश्वरव्यवहारसंपादकत्वात्उत्कृष्टंप्रधानंशरीरकंस्वार्थेकः एवमुपाधिभेदादेक
मेवचैतन्यंयतःपृथक्स्थितंजीवईशइतिभेदबुद्धिविषयमतोलक्षणयोपाधिपरित्यागेनस्वात्मानंआत्मनिअवधारयेदभेदेनजानीया
त् क्रमात्श्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवाक्यार्थविचारफलमाह कोशेष्विति आनंदमयस्यब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्संगात्ततदाकृतिर्वि
भातियथाजपादिसंगात्स्फटिकोनेकाकृतिर्भातिआनंदमयस्यापिजीवत्ववादिनांतुतेनसहपंचस्वकोशेष्वितिबोध्यंअस्मिन्महावाक्येपरितोवि
चारितेसम्यग्विचारितेसत्ययमात्मासंगरूपः अन्नमयादिभिः संगरहितः असंगोनहिसज्जतेइतिश्रुतेः अजोहृयश्चाविज्ञायनेस्थूलोहमि-
त्यादिस्त्वज्ञस्यतत्तत्कोशसंगात्प्रतीतिः स्फटिकवत् तत्वज्ञस्यतुनतथाप्रतीतिरितिभावः एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरास
एवविचारफलमितिभावः ३१ जाग्रदाद्यवस्थापिबुद्धिधर्मोनात्मधर्मइत्याह बुद्धेरितिइहआत्मनिस्वप्नादिभेदेनजाग्रत्स्वप्नसुषुप्तिभेदेनया

कोशेषुपंचस्वपितत्तदाकृतिर्विभातिसंगात्स्फटिकोपलोयथा असंगरूपोयमजोयतोद्वयोविज्ञायतेस्मिन्परितोविचा
रिते ३१ बुद्धेस्त्रियावृत्तिरपीहदृश्यतेस्वप्नादिभेदेनगुणत्रयात्मनः अन्योन्यतोस्मिन्व्यभिचारतोमृषानित्येपरे
ब्रह्मणिकेवलेशिवे ३२

त्रिधावृत्तिर्दृश्यतेसापिगुणत्रयात्मनः सत्वरज
स्तमोरूपगुणत्रयस्वरूपायाबुद्धेर्धर्मः उक्तावस्थात्रयस्योक्तमूलकत्वात् एतदवस्थानत्रयस्यास्मिन्अवस्थानंव्यभिचारतोमृषाबुध्यध्या-
सनिबंधनंनतुवास्तवमित्यर्थः अन्योन्यतोव्यभिचारतस्तस्यावस्थात्रयस्यस्वरूपतोमृषात्वात् तज्ज्ञानस्यमृषात्वमेव स्वप्नकालेजाग्रत्सुषुप्त्यो
रभावात् जाग्रतइतिइतरद्वयस्याभावात् सुप्तावितरयोरभावात् परस्परंव्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराहनित्येउत्पत्ति-
नाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवले ऽसंगेशिवेआनंदरूपेएवंभूतेसदैकरसेपरस्परव्यभिचारधर्मभानमसंभवीतिभावः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथत्याज्यत्वायसंसारमूलभूतांवृत्तिमाह देहेति एषांसंघात् इतरेतराध्यासविषयात्अजस्त्रंयावद्धियोबुद्धेर्वृत्तिस्तमोमूलतयाज्ञलक्षणा अज्ञत्वज्ञापिकायावत्परिवर्ततेतावद्भवोद्भवः संसारोद्भवोभवेत् तमःपदंरजसोप्युपलक्षणम् रजस्तमःप्रधानाबुद्धिः संसारहेतुत्वात्सर्वथा त्याज्येतिभावः ३२ कृतमहावाक्यविचारस्यकर्तव्यमाहनेतीति अथातआदेशोनेतिनेतीतिप्रमाणेननिराकृतंमिथ्यात्वेनगृहीतमखिलंजग येनसः ततोत्युदासत्वप्रधानेनमनसासम्यगास्वादितंचिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः स्वर्गादिसुपरिणामदुःखत्वात्तत्संभिन्न

देहेंद्रियप्राणमनश्चिदात्मनांसंघादजस्त्रंपरिवर्ततेधियः वृत्तिस्तमोमूलतयाज्ञलक्षणायावद्भवेत्तावदसौभवोद्भ-
वः ३३ नेतिप्रमाणेननिराकृताखिलोत्युदासमास्वादितचिद्घनामृतः त्यजेदशेषंजगदात्तषड्रसंपीत्वायथांभः
प्रजहातितत्फलम् ३४

मेव एवंभूतोशेषंजगत्देहेंद्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात्किंतूदासीनस्तत्रभवेत् ननुदेहेंद्रियादिभिरे वतत्त्वज्ञानलाभात्कथमुपजीव्यस्यत्यागइत्याशंक्यदृष्टांतदर्शनेनपरिहरति यथात्तृषावान् आत्तःषड्रसोमाधुर्यंयेनतादृशनारीकेरना रंगादिफलांतर्वर्त्यंभःपीत्वानतत्स्थानभूतंतत्फलंजहातितत्रोदासीनोभवतितद्वत् सर्वदृश्यसारांशोब्रह्मतल्लाभेसतिनिःसारंदृश्यंनोपादेयं नापिहेयमितिभावः यतोभयादिसंभावनात्तद्धेयमित्युच्यते ३४ ६ ६ ६ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह कदाचिदिति कदापीत्यर्थः अनवःउत्पत्त्यनंतरंविद्यमानोहिनवः तेनजन्मानं
तरास्तित्वंव्यावर्तितंनवत्वाभावेनैवजीर्णत्वाभावादवस्थांतरापत्तिरूपपरिणामोपिनिरस्तःअनेनजायतेस्तिविपरिणमतेवर्धतेपक्षी
यतेनश्यतीतिषड्भावविकाररहित्यमुक्तम् एवंचैतल्लिङ्गिनंसर्वमुक्तषड्भावविकारवत्वादनित्यमितिततोविरज्येतेतिबोधितंयतईह-
शोऽ तएवनिरस्तःसर्वस्यदेहेंद्रियादेरतिशयोमहत्त्वंयेनस्वलाभात्सः यल्लाभान्नापरोलाभइतिश्रुतेः यतःसुखात्मकःआनंदस्वरू
पःस्वयंप्रभःस्वप्रकाशःदेहेंद्रियादिस्तुदुःखरूपःपरप्रकाश्यश्चयस्यभासासर्वमिदंविभातीतिश्रुतेः सर्वगतोव्यापकः अयमहंबुद्धि

कदाचिदात्मानमृतोनजायतेनक्षीयतेनापिविवर्धतेऽनवः निरस्तसर्वातिशयःसुखात्मकःस्वयंप्रभः
सर्वगतोयमद्वयः ३५ एवंविधेज्ञानमयेसुखात्मकेकथंभवोदुःखमयःप्रतीयते अज्ञानतोध्यास
वशात्प्रकाशतेज्ञानेविलीयेतविरोधतःक्षणात् ३६

विषयःप्रत्यगात्मापिअद्वयःउक्ताद्वयब्रह्मस्वरूपएवनततोतिरिक्तइतिभावःअयमात्माब्रह्मेतिश्रुतेः ३५ नन्वेवंविधेविकारशून्ये
आत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशंकते एवंविधेइतिदुःखमयःदुःखप्रचुरःउत्तरयतिअज्ञानमूलकोयोध्यासो
देहांतःकरणादौअहंममेत्यध्यासस्तद्वशात् एवंचभ्रांतिरूपानत्प्रतीतिरितिभावः नन्वेवंकथंतस्यसंसारस्यनिवृत्तिस्तत्राहज्ञानेइतिआ
विर्भूतेइतिशेषः ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापिविलयइत्यर्थः यथारज्जौसर्पस्यलय
इत्यर्थः ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाध्यासलक्षणमाह यदन्यदिति यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमाद्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेऽसुविपश्चितोविद्वांसोध्या
सइत्याहुः यथासर्पभूतेरज्ज्वादौअहिविभावनंसर्पारोपोरज्जुबुद्धिमूलकस्तद्वदीश्वरेपिजगद्देहादिसंसारात्मकंसर्वंविभाव्यतेआत्मज्ञानाभावा
द्यथार्थतयाज्ञायते ३७ आत्मनिजगद्ज्ञानेकीदृशोध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहिते वस्तुतस्तत्संगरहिते-
चिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानंदमयेकेवलेसर्वविकारशून्येपरेदृश्यविलक्षणेब्रह्मणिव्यापकेआत्मनिप्रथ
ममहंकारः कल्पितः सएवाध्यासः अहंबुध्यात्मकोध्यासएवसर्वसंसारकारणमितिभावः ३८ बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्य

यदन्यदन्यत्रविभाव्यतेभ्रमात्अध्यासमित्याहुरमुंविपश्चितः असर्पभूतेहिविभावनंयथारज्ज्वादिकेतद्वद-
पीश्वरेजगत् ३७ विकल्पमायारहितेचिदात्मकेऽहंकारएषःप्रथमःप्रकल्पितः अध्यासएवात्मनिसर्वका-
रणेनिरामयेब्रह्मणिकेवलेपरे॥ इच्छादिरागादिसुखादिधर्मिकाःसदाधियःसंसृतिहेतवःपरे यस्मात्प्रसुप्तौ
तदभावतःपरःसुखस्वरूपेणविभाव्यतेहिनः ३९

न्वान्वयव्यतिरेकौप्रमाणयति इच्छादीति परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवः भासमानंसंसारकारणंसदाकालत्रयेपिइच्छादिरागा
दिसुखादिधर्मिकाः इच्छापेक्षौरागद्वेषौसुखदुःखेइत्येवमादिद्वंद्वधर्मिकाः धियएवधीषुसतीषुसंसारइत्यन्वयमुक्त्वातद्व्यतिरेकमाह
यस्मात्कारणात्प्रसुप्तौतदभावात् धीसत्त्वभावात् परआत्मानोऽस्माभिस्तृतीयार्थेषष्ठीसुखस्वरूपेणस्वस्वरूपमात्रेणाविभाव्य-
ते ननुसंसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात् तदात्मस्वरूपनिश्चयोस्तीतितात्पर्यम् २१

३९ ५ ५ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनस्तत्त्वंपदार्थस्वरूपमाह अनादीति अनादिर्याविद्यानतउद्भवोयस्याबुद्धेरंतःकरणस्यतत्रबिंबितःप्रतिबिंबितःचितःप्रकाशःसजीवइती
र्यते आत्मापरमात्माधियःसाक्षितयाधीधर्मासंगेनैवपृथक्स्थितअंतर्यामितयेत्यर्थः जीवोहंकर्तेत्यादिप्रकारेणांतःकरणधर्माध्यासवान्
परमात्मातुसाक्षीतयासर्वत्रविद्यमानोपिनतथेतिभावः अतएवबुध्यापरिछिन्नपरःबुद्धिलक्षणपरिछेदरहितःअतएवपरः एवंचज्ञा
नेनप्रतिबिंबाधारविलयेप्रतिबिंबस्यविलयात्स जीवःसएवपरमात्मैवहिप्रसिद्धंसइत्यस्यचावृत्तिर्बोध्या ४० अथबुध्यात्मनोः
परस्पराध्यासवशात्परस्परधर्मभानमितिदार्ढ्यायपुनराहचिद्बिंबेति चिदात्मचेतसोरन्योन्याध्यासवशात्परस्परतादात्म्यारोपाज्जडा

अनाद्यविद्योद्भवबुद्धिबिंबितोजीवःप्रकाशोयमितीर्यतेचितः आत्माधियःसाक्षितयापृथक्स्थितोबुध्या
परिछिन्नपरःसएवहि ४० चिद्बिंबसाक्षात्मधियांप्रसंगादेकत्रवासादनलाक्तलोहवत् अन्योन्यमध्यासव
शात्प्रतीयतेजडाजडत्वंचचिदात्मचेतसोः ४१

जडत्वंप्रतीयतेचेतसोवृत्तीनांज्ञानत्वंजीवात्मनोजडत्वंप्रतीयते
अतएवज्ञानाश्रयआत्मेतिचितएवतार्किकव्यवहारः जीवात्मनिजडात्माकथ्यतेबुधैरितिस्मार्तव्यवहारश्च अध्यासहेतुःचिदित्यादि
चिद्बिंबयस्यसचिदाभासःअक्षैःसहितःसाक्षःसेंद्रियःसचासावात्मनःधीरंतःकरणंतेषांप्रकृष्टसंगात् अतिसन्निकर्षादध्यासइत्य
र्थः तत्रदृष्टांतअनलाक्तलोहवत् अग्नितप्तलोहपिंडवत् अग्निधर्मोदाहकत्वंलोहधर्मश्ववर्तुलत्वाद्यनलेभासतेतत्रहेतुरेकत्रवा
सात्परस्पराविभागेनवृत्तेरित्यर्थः तद्वदेनयोरपिपरस्परधर्माध्यासइत्यर्थः ४१ ९ ९ ९ ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ०रा० समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह पूर्वमिति समाधेःसकलविषयव्यासंगनिवृत्तिपूर्वकंब्रह्माकारवृत्तिः समाधिस्ततःपूर्वंअखिलंसचरा उ०कां०
२३ चरंजगत् ओंकारमात्रंविचिंतयेत् ओंकारोमीयतेनयेतिमात्राप्रमाणंबोधकत्वेनपरिछेदकोयस्यतथाजानीयात् तदेवविवृणोति तदे
वेतिजगदेवेत्यर्थः प्रणवोवाचकोविभाव्यते एतत्हिप्रसिद्धइत्यर्थः इयंभावनाज्ञानवशादेव तबोधतः निर्विशेषब्रह्मसाक्षात्कारत
स्तदुत्तरंतेत्यर्थः तस्यसर्वद्वैतरूपमर्दकत्वात् ४८ उक्तमर्थंविवृणोतिअकारेति अकारसंज्ञस्तद्वाच्यः पुरुषोहिविश्वकोविश्वएववि
श्वकः विश्वशब्देनपरिभाषितः अयंजाग्रत्साक्षीविराट् ततः स्वप्नसाक्षीतैजसःस्तेनपदेनपरिभाषितः लिंगदेहाभिमानीहिरण्यग

पूर्वंसमाधेरखिलंविचिंतयेदोंकारमात्रंसचराचरंजगत् तदेववाच्यंप्रणवोहिवाचकोविभाव्यतेज्ञानवशा
त्तबोधतः ४८ अकारसंज्ञः पुरुषोहिविश्वकोत्वुकारकस्तैजसईर्यतेक्रमात् प्राज्ञोमकारः परिपठ्यतेऽ
खिलैः समाधिपूर्वंनतुतत्त्वतोभवेत् ४९ विश्वंत्वकारंपुरुषंविलापयेदुकारमध्येबहुधाव्यवस्थितं ततोम
कारेप्रविलाप्यतैजसंद्वितीयवर्णंप्रणवस्यचांतिमे ५०

र्भउकारकः उकारप्रतिपाद्यईर्यतेततः सुषुप्तिसाक्षीप्राज्ञपद
वाच्योमायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः इयंभावनासमाधिपूर्वंसमाधेः पूर्वमेवनतत्त्वतः तत्त्वसाक्षात्कारेसतितन्नभवे
त् सर्वस्यब्रह्मणीप्रविलयात् ४९ अथविलापनप्रकारमाह द्वाभ्यांविश्वंत्विति उकारमध्येबहुधाव्यवस्थितंस्थूलदेहनिबंधनंस्थूल
भोगाऽभिमानेनस्थितंविश्वंपुरुषंतद्वाचकमकारंचविलापयेत्तुश्चार्थेविलीनंभावयेत् ततस्तैजसंलिंगदेहाभिमानिनंपुरुषंतद्वा- २३
चकंप्रणवद्वितीयवर्णंउकारंविलीनविश्वकंमकारेविलाप्यविलीनंभावयित्वा ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्ताहृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषंइहात्मनिचिद्घनेपरेविलापयेत् तथाभावयेत्ततः सोहंसर्वविलापाधिष्ठानं परंब्रह्मेतिविभावयेत् [redacted] तद्विशिनष्टि सदाविमुक्तिमत्त्वनित्यमुक्तंनन्वहंपदार्थस्यराग द्वेषादिमलिनस्यकथंब्रह्मत्वभावनेत्याशंक्याहंपदार्थंविशिनष्टिउपाधितोमुक्तः अतएवामलः तथाभावनेसाधनेविज्ञानदृक् विज्ञानं निदिध्यासनंब्रह्ममात्रप्रत्ययाविछेदरूपाहकूतत्साक्षात्कारेसाधनंयस्यसः ५१ एवंभावनावतोलक्षणमाह एवमिति उक्तप्रकारेणसदा जातापरमात्मन्येकभावनायस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः अतएवस्वस्वरूपानंदेनैवतुष्टः नतुविषयानंदेन तस्यपरिणा

मकारमप्यात्मनिचिद्घनेपरेविलापयेत्प्राज्ञमपीहकारणम् सोहंपरंब्रह्मसदाविमुक्तिमद्विज्ञानदृङ्मुक्तउपाधितोम
लः ५१ एवंसदाजातपरात्मभावनः स्वानंदतुष्टः परिविस्मृताखिलः आस्तेसनित्यात्मसुखप्रकाशकः साक्षा
द्विमुक्तोचलवारिसिंधुवत् ५२ एवंसदाभ्यस्तसमाधियोगिनोनिवृत्तसर्वेंद्रियगोचरस्यहि विनिर्जिताशेषरिपो
रहंसदादृश्योभवेयंजितषड्गुणात्मनः ५३

मेदुःखरूपत्वात्ततोविरक्तइत्यर्थः साक्षात्नित्यात्मनिसुखप्रकाशकः सा क्षात्औपाधिकनामरूपभेदराहित्येननित्यमखंडितंआत्मस्वरूपंयत्सुखप्रकाशश्चतद्रूपः एवंरूपोविमुक्तोजीवन्मुक्तः अचलंनिश्चलंवा- रियस्यताहशासिंधुवदास्ते विषयसंबंधरूपलहरीरहितआस्तेइत्यर्थः ५२ ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह एवमितिउक्तप्रकारेणसदा- भ्यस्तसमाधेर्योगिनः निवृत्ताः सर्वेषामिंद्रियाणांगोचराविषयाः शब्दादयोयस्यतस्यविनिर्जिताअशेषारिपवः कामादयोयेनतस्यतज्ज येनविषयेषंतः करणाप्रवृत्तिः सूचिता अतएवसर्वज्ञत्वनित्यत्वेनित्यतृप्तत्वबोधरूपत्वस्वतंत्रत्वनित्यमलुप्तत्वाऽनंतरूपाः षड्गुणाय- स्यताहशाआत्माजितोवशीकृतोयेनतस्यसदादृश्योभवेयं एतेनमद्भक्तस्ययोगिनोहंदृश्योनतुभक्तिविमुखस्येतिसूचितम् ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ०रा० एवंविधोजीवन्मुक्तः प्रारब्धवशेनानभिमानः भोगानश्नन्तिष्ठेत् ततोमय्येवविलीयतेमद्रूपोभवतीत्याह ध्यात्वैवमिति ५४ सर्वधर्मापेक्षया उ० कां०
२४ यमेवधर्मोज्यायानित्याह आदौचेति भवंसंसारंआदिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादैर्यजेते
त्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा आखिलात्मनांजीवानांस्वरूपभूतंमामात्मानंपरमेश्वरंभजेत् यथाधनस्या-
र्जनेनादौदुःखंमध्येपालनकृतम् तत्रराजादिकृतभयम् अंतेनाशेशोकपर्यवसायिदुःखमेवंपदार्थमात्रेद्रष्टव्यम् ५५ मय्य

ध्यात्वैवमात्मानमहर्निशंमुनिस्तिष्ठेत्सदामुक्तसमस्तबंधनः प्रारब्धमश्नन्नभिमानवर्जितोमय्येवसाक्षात्प्रवि-
लीयतेततः ५४ आदौचमध्येचतथैवचांततोभवंविदित्वाभयशोककारणम् हित्वासमस्तंविधिवादचोदि
तंभजेत्स्वमात्मानमथाखिलात्मनाम् ५५ आत्मन्यभेदेनविभावयन्निदंभवत्यभेदेनमयात्मनातदा यथा
जलंवारिनिधौयथापयःक्षीरेवियद्व्योम्न्यनिलेयथानिलः ५६

भेदभावनयानामरूपाविभागेनमद्रूपएवभवतीत्यस्यार्थंसदृष्टांतमाहात्मनीतिआत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपंजीवमभेदेनविभा
वयन्यदातिष्ठतीतिशेषः तदामयात्मनापरमेश्वरेणाभेदेनभवतिअभिन्नोभवति तत्रदृष्टांतः यथासमुद्रेप्रविष्टंनद्यादिजलंसमु
द्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेवयथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाऽकाशोघटादिभंगेयथाचर्मभस्त्रिकाद्यव- २४
च्छिन्नोवायुरनिलेमहावायौनामरूपाविभागेनैकीभवतीत्यर्थः ५६ ५ ५ ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमात्मतत्वज्ञस्यजगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह इत्थमिति हिअप्यर्थेलोकसंस्थितोजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्व-
न्नपिजगन्मृषैवेतिभावयन्सन्यदियदाइत्थमीक्षेतऐकात्म्यंजानीयात् तदानिवृत्तजगत्सत्यत्वभ्रमोभवतीतिशेषः तत्रहेतुःश्रुतियु-
क्तिमानतोनिराकृतत्वात् अतोन्यदार्त्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहिताऽनुमानरूपान्मानतः
प्रमाणतोनिराकृतत्वात्तत्रदृष्टांतोयथेंदुभेदः एकचंद्रेद्विचंद्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्त्ततेयथाचदिशिप्राच्यादौअन्यदिकूत्वभ्रमःसो
पितत्वज्ञानान्निवर्तते एवंचभ्रमतःपुरुषस्यदिक्षुभ्रमणभ्रमःनिकटवर्तिवृक्षादौचभ्रमणभ्रमस्तत्स्थैर्यज्ञानेनविनिवर्ततेतद्वत् ५७

इत्थंयदीक्षेतहिलोकसंस्थितोजगन्मृषैवेतिविभावयन्मुनिः निराकृतत्वाछ्रुतियुक्तिमानतोयथेंदुभेदोदिशि
दिग्भ्रमादयः ५७ यावन्नपश्येदखिलंमदात्मकंतावन्मदाराधनतत्परोभवेत् श्रद्धालुरत्यूर्जितभक्तिलक्ष
णोयस्तस्यदृश्योहमहर्निशंहृदि ५८ रहस्यमेतछ्रुतिसारसंग्रहंमयाविनिश्चित्यतवोदितंप्रिय यस्त्वेत
दालोचयतीहबुद्धिमान्समुच्यतेपातकराशिभिःक्षणात् ५९

ईदृशज्ञानेमदाराधनमेवोपायइत्याह यावदिति अखिलंजगत्मदात्मकंमदधिष्ठानकंमद्विवर्तभूतंयावन्नपश्येत् तावत्प्राप्तयेश्र
द्धालुःभगवदाराधनमेवज्ञानप्रापकमित्यत्रदृढविश्वासवान्अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपाचिन्हं
लक्षणंयस्यसःतावन्मदाराधननिष्ठोभवेत्एवंहितस्यत्द्हृदिअहमहर्निशंदृश्योभवामि येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहमि
तिस्मृतेः ५८ स्वोक्तवचनजातस्यश्रुतिसमत्वंकथमेतदालोचनमपिमदाराधनप्रतिबंधकदुरितध्वंसोपायइत्याह रहस्यमिति श्रु
तिसारसंग्रहत्वेनातिगोपनीयताअप्रमाणशंकाकलंकराहित्यंसूचितम् आलोचयतिसम्यग्विचारयति ५९ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथभगवान् उक्तमेवार्थंसंक्षेपेणदार्ढ्यायपुनराह त्यक्त्वेति यदीतियदित्यर्थे यदिदंजगत्परिदृश्यतेतत्सर्वंमायैवेतिज्ञाप्यतेइति शेषः चेतसासर्वंपरित्यज्यतत्रौदासिन्यंकृत्वामद्भावनयामदैक्यभावनयाभावितंशुद्धंमानसंयस्यतादृशस्तिष्ठ इत्युपदिश्याशिषः प्राहनिरामयःसन्सुखीभव सर्वदुःखनिवृत्त्येतिभावः ततोंतरंगामन्यामाह आनंदमयोभव तद्रूपोभवेत्यर्थः यद्यपिपूर्वमानंदरूपत्वमस्त्येवतथापितत्प्राप्तिः विस्मृतकंठस्थभूषणाप्राप्तिवत् ६० एवंरीत्यास्वोपासकस्यलोकपावनत्वमाहयइ-ति कदावायदाकदाचिदित्यर्थः इदानिर्मलेनांतःकरणेनयोमामगुणंप्राकृतसत्वरजस्तमोरूपगुणरहितं सच्चिदानंदरूपत्वा

त्यक्त्वायदीदंपरिदृश्यतेजगत्मायैवसर्वंपरिहृत्यचेतसा मद्भावनाभावितशुद्धमानसःसुखीभवानंदमयो निरामयः ६० यःसेवतेमामगुणंगुणात्परंहृदाकदावायदिवागुणात्मकम् सोहंस्वपादांचितरेणुभिःस्पृशन्पुनातिलोकत्रितयंयथारविः ६१

तु अतएवगुणात्परंगुणादव्याकृतात्परंमायातीतंयदिवायद्वेत्यर्थेगुणात्मकम् सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मा मूर्तिर्यस्यतंदृश्यमानरूपंसेवते सद्विविधोप्युपासकः अहंमत्स्वरूपएव मामकइत्यर्थोवाप्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइत्युक्तेः तादृशोभक्तः स्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपिपुनातिअज्ञानध्वांतनिरसनेनपवित्रीकरोति यथा रविःस्वकरैर्जगद्वितिमिरीकरोतितद्वत् ६१ ६ ६ ६ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीमेतद्ग्रंथार्थालोचनासमर्थस्यपाठमात्रतोपिमहत्फलमाह विज्ञानंविज्ञानजनकंकरणव्युत्पत्त्येतिबोध्यंवेदांतैरुपनिषद्वाक्यैर्वे
द्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेनननुपाठमात्रादेतादृशमहत्फलप्राप्तिः कथमित्याशंक्यभवत्येवेतिसूचितेतत्रहेतुमाह मद्वच
नेषुभक्तिर्विश्वासोयदीत्यर्थेगुरुवाक्यविश्वासस्यैवफलदायकत्वादितिभावः ६२ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थत्वा
दिबिरुदावलीविराजमानस्यहिम्मतिवर्मणः पुत्रस्यश्रीरामवर्मणः कृतावध्यात्मरामायणसेतौउत्तरकांडेपंचमःसर्गःसमाप्तः ५ ए

विज्ञानमेतदखिलंश्रुतिसारमेकंवेदांतवेद्यचरणेनमयैवगीतम् यःश्रद्धयापरिपठेद्गुरुभक्तियुक्तोमद्रूपमेतियदि
मद्वचनेषुभक्तिः ६२ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेश्रीरामगीतापंचमःस-
र्गःसमाप्तः ५ एकदामुनयःसर्वेयमुनातीरवासिनः आजग्मुराघवंद्रष्टुंभयाल्लवणरक्षसः १ कृत्वाग्रे
तुमुनिश्रेष्ठंभार्गवंच्यवनंद्विजाः असंख्याताःसमायातारामादभयकांक्षिणः २ तान्पूजयित्वापरयाभक्त्याराघ
घुकुलोत्तमः उवाचमधुरंवाक्यंहर्षयन्मुनिमंडलम् ३ करवाणिमुनिश्रेष्ठाःकिमागमनकारणम् धन्योस्मि
यदियूयंमांप्रीत्याद्रष्टुमिहागताः ४ दुष्करंचयत्कार्यंभवतांतत्करोम्यहम् आज्ञापयंतुमांभृत्यंब्राह्मणा
दैवतंहिमे ५ तच्छ्रुत्वासहसाहृष्टश्च्यवनोवाक्यमब्रवीत् मधुनामामहादैत्यःपुराकृतयुगेप्रभो ६ आसी
दतीवधर्मात्मादेवब्राह्मणपूजकः तस्यतुष्टोमहादेवोददौशूलमनुत्तमम् ७ प्राहचानेनयंहंसिसतुभस्मीभ
विष्यति रावणस्यानुजाभार्यातस्यकुंभीनसीश्रुता ८ कृदेति लवणरक्षसः लवणनाम्नोभयादित्यर्थः १ रामाल्लवणकृतभय
नाशकांक्षिणः २ हेमुनिश्रेष्ठाःअहंकिंभवत्कार्यंकरवाणि मत्समीपेभवदागमनस्यचकिंकारणंयदियत्प्रीत्यासर्वदुःखनिवर्त्तनक्षमत्व
बुध्यायाप्रीतिस्तयायावत्द्रष्टुमागतास्तर्हिधन्योस्मि ४ ५ ६ अनुत्तमंनविद्यतेशत्रुवधउत्तममधिकंयस्मात्तत् ७ ८ ७ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 यतोदुरात्मातःसर्वैर्दुर्धर्षोदुःसहः ९ वोयुष्माकंमाभीःभवत्वितिशेषः १० विगतज्वराःगतदुःखाः ११ लवणंराक्षसमित्यस्यकोवा
 हनिष्यतीत्यनेनान्वयःकोवाब्राह्मणेभ्योभयंदद्यात्तदास्यतीत्यर्थः १२ १३ १४ वधायचवधायत्वित्यर्थः हन्यांहनिष्यामीत्यर्थः

तस्यांतुलवणोनामराक्षसोभीमविक्रमः आसीद्दुरात्मादुर्धर्षोदेवब्राह्मणहिंसकः ९ पीडितास्तेनराजेंद्रवयंत्वांशरणंगताः तच्छ्रुत्वाराघवोप्याहमाभीर्वोमुनिपुंगवाः १० लवणंनाशयिष्यामिगच्छंतुविगतज्वराः इत्युक्त्वाप्राहरामोपिभ्रातॄन्कोवाहनिष्यति ११ लवणराक्षसंहत्वाब्राह्मणेभ्योभयंमहत् तच्छ्रुत्वाप्रांजलिःप्राहभरतोराघवायहि १२ अहमेवाहनिष्यामिदेवाज्ञापयमांप्रभो ततोरामंनमस्कृत्यशत्रुघ्नोवाक्यमब्रवीत् १३ लक्ष्मणेनमहत्कार्येकृतंराघवसंयुगे नंदिग्रामेमहाबुद्धिर्भरतोदुःखमन्वभूत् १४ अहमेवागमिष्यामिलवणस्यवधायच त्वत्प्रसादाद्रघुश्रेष्ठहन्यांतंराक्षसंयुधि १५ तच्छ्रुत्वास्वांकमारोप्यशत्रुघ्नंशत्रुसूदनम् प्राहाद्यैवाभिषेक्ष्यामिमथुराराज्यकारणात् १६ अनाय्यचस्कसंभारान्लक्ष्मणेनाभिषेचने अनिच्छंतमपिस्नेहादभिषेकमकारयत् १७ दत्वातस्मैशरंदिव्यंरामःशत्रुघ्नमब्रवीत् अनेनजहिबाणेनलवणंलोककंटकम् १८ सतुसंपूज्यतच्छूलंगेहेगच्छतिकाननम् भक्षणार्थंतुजंतूनांनानाप्राणिवधायच १९ सतुनायातिसदनंयावद्वनचरोभवेत् तावदेवपुरद्वारितिष्ठत्वंधृतकार्मुकः २०

१५ १६ अभिषेचननिमित्तंविषयसप्तम्यामयमर्थःफलतिअकारयत्वसिष्ठादिभिरितिशेषः १७ १८ गेहेसंपूज्यस्थापयित्वावनं
गच्छतीत्यर्थः १९ सतुयावद्वनचरोभवेत्भवतिसदनंनायातितावदेवेत्यन्वयः २० ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.12.19 16:18
,TRANSFERRED=2019/12/13 at 16:24:40
,PAGES=27
,TYPE=STD
,NAME=S0002344
,Book Name=M-2255-ADHYATAM RAMAYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection